न तस्याः कालदोषेण परिणामो नरर्षभ ! ।
आद्यन्तरहिता सा हि नित्यं कारणमव्ययम् ॥
शक्तिर्भगवतः सा हि तदेकपरमा च सा ।
इत्युक्तः प्रलयो राजन् ! विश्वस्यास्य महामते ! ॥
यथोत्पत्तिक्रमेणास्य व्युत्क्रमेण लयस्तथा ॥"
इति पाद्मे स्वर्गखण्डे ३६ अध्यायः ॥
( सात्त्विकविकारान्तर्गतविकारविशेषः । तल्लक्षणं यथा, साहित्यदर्पणे । ३ । १६७ ।
"प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ॥")

प्रलापः, पुं, ( प्रलपनमिति । प्र + लप् + भावे घञ् । ) प्रलपनम् । अनर्थकवाक्यम् । निष्प्रयोजनमुन्मत्तादिवचनम् । इत्यमरभरतौ । १ । ६ । १५ ॥ रोगाणामुपसर्गोऽयम् ॥ ( यथा, भावप्रकाशे ।
"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः ।
उपद्रवा भवन्त्येते ज्वरिते रक्तपित्ततः ॥"
अस्य लक्षणं चिकित्सा च यथा,—
"स्वहेतुकुपिताद्वातादसम्बद्धमनर्थकम् ।
वचनं यन्नरो ब्रूते स प्रलापः प्रकीर्त्तितः ॥
सतगरवरतिक्ता रेवताभीरुतिक्ता
नलदतुरगगन्धा भारती हारहूरा ।
मलयजदशमूलीशालपर्णी सुपक्वा
प्रलपनमपहन्तुः पानतो नातिदूरात् ॥
वरतिक्तोऽत्र पर्पटः नलदस्तूशीरं भारती ब्राह्मी हारहूरा द्राक्षा ।" इति भावप्रकाशस्य मध्यखण्डे प्रथमे भागे ॥ )

प्रलापहा, [ न् ] पुं, ( प्रलापं हन्तीति । हन् + क्विप् । ) कुलत्थाञ्जनम् । इति राजनिर्घण्टः ॥

प्रलीनता, स्त्री, ( प्रलीनस्य निश्चेष्टस्य भावः । प्रलीन + तल् । ) प्रलयः । तत्पर्य्यायः । इन्द्रियस्वापः २ चेष्टानाशः ३ । इति राजनिर्घण्टः ॥

प्रलेहः, पुं, ( प्रलिह्यते इति । प्र + लिह् + घञ् । ) व्यञ्जनविशेषः । इति पाकराजेश्वरः । कल्पोखल कोरमा इत्यादि पारस्यभाषा ॥ ( चिन्तामणौ धृतः प्रलेहप्रकारो यथा,—
"स्थूलानि मांसखण्डानि क्षालितानि च वारिणा ।
तप्तस्नेहे विनिःक्षिप्य दर्व्या सञ्चालयन् पचेत् ॥
तप्तं तत्र विनिःक्षिप्य लावणं जलमल्पकम् ।
पचेत् पटपटाशब्दं तस्मिन् मांसे प्रकुर्व्वति ॥
प्रक्षिपेद्दाडिमीनीरं बहुलेन पचेत् पुनः ।
मांसपिण्डेषु सिद्धेषु देया शुण्ठी सजीरका ॥
ततश्चोत्तार्य्य तन्मांसं पृथक् कुर्य्यात् प्रलेहतः ।
प्रलेहं वाससा पूतं स्थापयेदन्यभाजने ॥
हिङ्गुना घृतयुक्तेन धूपेन तच्च धूपयेत् ॥"
गौड़देशीयप्रलेहस्तु ।
"हिङ्ग्वार्द्रबीजपूरैलालवणैः सम्भृतेन तु ।
कुट्टितामिषपिष्टेन तत्र दाड़िमजीरतः ॥
सोषणावेसवारश्च प्रलेहो गौड़देशजः ॥
प्रलेहो रुचिरो बल्यः कफानिलरुजापहः ।
संग्राही पित्तकृत् किञ्चिच्छिलाश्वासगदान् जयेत् ॥"
पूर्णप्रलेहस्तु ।
"मांसपूरणयोगेन कोष्ठाकारं विधाय च ।
स्विन्नं शस्तं घृते भृष्टं प्रलेहविधिना पचेत् ॥
पूरणस्य प्रलेहोऽयं विज्ञेयो वातनाशनः ।
श्लेष्मात्मकारकश्चैव सुखवैरस्यहृद्गुरुः ॥"
शुक्लवर्णः प्रलेहः ।
"घृते वेसरधान्याकहिङ्गुरुद्दधिसंयुते ।
वस्त्रपूतेऽर्द्धसम्पक्वे स्विन्नं मांसं विनिःक्षिपेत् ॥"
पीतवर्णस्तु ।
"प्रलेहः पीतवर्णोऽपि कार्य्यः शुक्लप्रलेहवत् ।
विशेषोऽत्र हरिद्रायाः संसर्गः कुङ्कुमस्य वा ॥"
रक्तवर्णोऽपि ।
"तप्तस्नेहे क्षिपेद्धिङ्गुसंयुतं कासमर्द्दकम् ।
धान्यकं लवणाजाजीश्वेतं मांसञ्च तत् क्षिपेत् ॥
ततोऽर्द्धसुटिते मांसे दाड़िमीबीजसंयुते ।
सम्पक्वे चातिमृदुले तक्रं शुण्ठीञ्च निःक्षिपेत् ॥
तत उत्तार्य्य वस्त्रेण गालयेद्धूपयेदपि ।
रक्तवर्णप्रलेहस्य संसिद्धार्थं विनिःक्षिपेत् ॥
कारमर्द्दं दाड़िमस्य स्थाने शेषन्तु पूर्व्ववत् ॥"
हरितवर्णस्तु ।
"मेथिकाकासमर्द्दाम्लकल्केन चलकारिते ।
घृते मांसं विनिःक्षिप्य पचेच्छुक्लप्रलेहवत् ॥
सिद्धे च गालयेद्वस्त्रे कृत्वा वर्णप्रयोजनम् ।
ताम्बूलं वटजञ्चारं देयं हरितहेतुना ॥
अरुचौ रुचिदः सद्यो नानावर्णप्रसाधितः ।
प्रलेहः कफवातघ्नः किञ्चित् पित्तकरो लघुः ॥"
वटकप्रलेहोऽपि ।
"माषस्य पिष्टिका कृत्वा वेसवारेण संयुता ।
बहुधा क्रियते तस्या वटिकावटकादिकम् ॥
आम्रबिम्बीफलाकारं लड्डुकावटकादिकम् ।
शृङ्गाटकफलाकारं यथाबुद्धिप्रकारजम् ॥
कृत्वा हि बहुधाधारे स्वेदितं घृतभर्ज्जितम् ।
सवेसवारके तक्रे क्वथिते च मनोरमे ॥
निःक्षिप्य पाचयेदोषदुत्तार्य्यैलादिवासिते ।
एवन्तु बहुधा कार्य्यो माषतुल्यप्रलेहकः ॥
प्रलेहो वातजिद्बल्यः शुक्रमांसप्रदो रसः ।
प्रीणनः प्राणयुक्तानां शुक्रदः क्षीणरेतसाम् ॥"
मत्स्यप्रलेहस्तु ।
"मांसप्रलेहवत्कार्य्यः प्रलेहो मत्स्यसम्भवः ।
आदौ तैले परं पक्वं सर्व्वमन्यत्तु पूर्व्ववत् ॥
वर्णस्य कारणं देयं पूर्व्वोक्तं प्रथकं हि यत् ।
उद्धूलनं सुगन्धाय दातव्यं पूर्व्वसम्भवम् ॥"
मत्स्यखण्डप्रलेहस्तु ।
"सम्यक् प्रक्षालितं मत्स्यं वेसवारेण वेष्टितम् ।
तप्ततैले क्षिपेत् खण्डं हिङ्गुसैन्धवमिश्रितम् ॥
प्रलेहविधिवत् साध्यो मत्स्यखण्डप्रलेहकः ॥")

प्रवक्ता, [ ऋ ] त्रि, प्रकर्षेण वक्ति यः । ( प्र + वच् + तृच् । ) वेदादिवाचकः । यथा,—
"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥"
इति मानवे ७ अध्यायः ॥

प्रवचनं, क्ली, ( प्रकर्षेण उच्यते इति । प्र + वच् + ल्युट् । वेदः । ( यथा, अमरकोषे । २ । ७ । १० ।
"अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः ।
लब्धानुज्ञः समावृत्तः सुत्वा त्वभिषवे कृते ॥"
वेदाङ्गम् । यथा, मनुः । ३ । १८४ ।
"अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥"
"प्रकर्षेणैव उच्यते वेदार्थ एभिरिति प्रवचनान्यङ्गानि तेषु अग्र्याः षड़ङ्गविदः ।" इति तत्र कुल्लूकभट्टः ॥ तथा च हरिवंशे । १६७ । ६६ ।
"उवाच वेदांश्चतुरो मन्त्रप्रवचनार्थितान् ॥"*॥
प्रकृष्टं वचनमिति कर्म्मधारयः ।) प्रकृष्टवाक्यम् । इति मेदिनी । ने, १६१ ॥ ( यथा, मुण्डकोपनिषदि । ३ । २ । ३ ।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")

प्रवचनीयः, त्रि, ( प्रवक्तीति । प्र + वच् + "भव्यगेयप्रवचनीयेति ।" ३ । ४ । ६८ । इति कर्त्तरि अनीयर् । ) प्रवक्ता । ( प्रोच्यते इति । प्र + वच् + कर्म्मणि अनीयर् । ) प्रवाच्यः । इति मेदिनी । ये, १३२ ॥

प्रवणः, पुं, ( प्रवन्ते गच्छन्ति जना अनेनेति । प्रु गतौ + करणे ल्युट् । ) चतुष्पथः । इत्यमरः । ३ । ३ । ५६ ॥

प्रवणः, त्रि, ( प्रवतेऽत्रेति । प्रु + अधिकरणे ल्युट् । ) क्रमनिम्नभूमिः । ( यथा, मनुः । ३ । २०६ ।
"दक्षिणाप्रवणञ्चैव प्रयत्नेनोपपादयेत् ॥" )
उदरम् । प्रह्वः । इति मेदिनी । ने, ५६ ॥ ( यथा, मार्कण्डेये । २३ । ८६ ।
"धन्योऽहमतिपुण्योऽहं कोऽन्योऽस्ति सदृशो मया ।
यत्तातो मामभिद्रष्टुं करोति प्रवणं मनः ॥" )
आयतः । प्रगुणः । क्षणः । इति विश्वः ॥ ग्रुतः । स्निग्धः । इति शब्दरत्नावली ॥ आसक्तः । इति हेमचन्द्रः । ३ । ४६ ॥ ( यथा, विष्णुपुराणे । ६ । १ । ११ ।
"प्रजास्ता ब्रह्मणा सृष्टाश्चातुर्व्वर्ण्यव्यवस्थितौ ।
सम्यक्श्रद्धासमाचारप्रवणा मुनिसत्तम ! ॥" )
क्षीणः । इति धरणिः ॥

प्रवत्स्यत्पतिका, स्त्री, ( प्रवत्स्यन् प्रवासं गमिष्यन् पतिर्यस्याः । कप् । ) नायिकाभेदः । अस्या लक्षणम् । यस्याः पतिरग्रिमक्षणे देशान्तरं यास्यत्येव सा । अस्याश्चेष्टा काकुवचनकातरप्रेक्षणगमनविघ्नोपदर्शननिर्व्वेदसन्तापसम्मोहनिश्वासवाष्पादयः ॥ मुग्धा प्रवत्स्यत्पतिका यथा,—
"प्राणेश्वरे किमपि जल्पति निर्गमाय
वामोदरी वदनमानमयाञ्चकार ।
आली पुनर्निभृतमेत्य लतानिकुञ्ज-
गुञ्जत्कोकिलकलध्वनिमाततान ॥" १ ।